**Kaumodaki : Journal of Multidisciplinary Studies**
[A Peer-Reviewed, Open Access Journal; Indexed in NepJoL]
ISSN : 2822 - 1567 (Print); ISSN : 2822 -1583 (Online)
Published by Research Management Cell, Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

# मतान्तरालोचनपुरस्सरं वैयाकरणमते धात्वर्थानुशीलनम्

**भोलानारायण रेग्मी**
Department of Vyakaran (Sanskrit Grammar), Shree Vinduwasini Sanskrit Vidyapeeth (Campus), Pokhara, Nepal

***Article History :*** *Submitted 29 Sep. 2023; Reviewed 09 Oct. 2023; Accepted 25 Oct. 2023*
***Corresponding Author :*** *Bholanarayan Regmi,* ***Email :*** *drbholanarayanregmi@gmail.com*
***DOI :*** *https://doi.org/10.3126/kdk.v4i1.64543*

*Copyright 2024 © the Author(s) and the Publisher*

**लेखसार**

*प्रस्तुतोऽयमालेखो मतान्तरालोचनपूर्वकं वैयाकरणमते धात्वर्थानुशीलने केन्द्रितोऽस्ति । सकलव्युत्पत्तेर्बीजभूतत्वात् सर्वशब्दमूलको धातुर्वर्तते । शब्दशास्त्रस्य सार्थक्यानुशीलनं कुर्वाणाः प्राच्यार्वाचीनाः शाब्दिकाः पाणिनि (त्रिमुनि) व्याकरणाधीनाः। अत्र च शोधशीर्षकघटकमतान्तरपदेन स्वेतराणां नैयायिकानां मीमांसकानाञ्च मतानि कोडीकृतानि सन्ति । तेषां मते धात्वर्थः फलमात्रं आहोस्वित् व्यापारश्च कः? एकतरमते शाब्दबोधे किमभिन्नं भिन्नं वा, अपि च मीमांसकानां मते प्रभाकरस्य कुमारिलभट्टस्य च भावनाप्रधाने शाब्दीभावनाया आर्थीभावानायाश्च भेदद्वयं दृश्यते तयोश्च व्यापाररूपत्वं हृदि निधाय समापतितानां दोषाणां प्रदर्शनपूर्वकं नैयायिकाः किं विवदन्ते तद्दोषवारणाय कौण्डभट्टमतस्योत्तररूपेण "फलव्यापारयोर्धातु राश्रये तु तिङः स्मृतः.............. इति कारिकामुररीकृत्य धात्वर्थः कः ? व्यापारः कः ? फलञ्च किम् ? फलमात्रस्वीकारे को दोषः, भावनामुख्यविषयभूतानां प्रभाकरमीमांसकानां मते व्यापारमात्रं धात्वर्थस्वीकारे शाब्दबोधरूपपरिनिष्ठितलक्ष्ये को व्यात्यासः, वैयाकरणेष्वपि नागेशभट्टस्य किञ्चिद् भिन्नं मतं दृश्यते तदपि दृग्गोचरीकृत्य परिवेषणमस्यानुसन्धानकार्यस्य विषयो विद्यते । तद्यथा–*

**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृतः ।**
**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ।** *(कौण्डभट्ट, वि.सं २०४५ पृ.सं ७)*

*फलव्यापारयोः, इत्यत्र सप्तम्या विभक्तेः, निरूपितत्वमर्थः, अर्थात् फलनिष्ठं व्यापारनिष्ठञ्च यद् वाच्यं तन्निरूपितवाचकतावत्वं धातौ वर्तते । अत्र द्विवचनदर्शनेन च फले व्यापारे च धातोः पृथक् पृथक् शक्तिः सिद्ध यति । अस्मिन् स्थले फलावच्छिन्ने व्यापारे एकैव विशिष्टा शक्तिरिति स्वीकारे तण्डुलान् पचतीत्यादौ तुण्डुलानाम्, चैत्रेण, तण्डुलाः पच्यन्ते इत्यादौ व्यापारे चैत्रस्य च अन्वयो न स्यात् "पदार्थः पदार्थेनाऽन्वेति न तु पदार्थैकदेशेन" इति नियमात् । तस्मात् एकवृन्तगतफलद्वय– फलत्रितयादि –न्यायेन फले व्यापारे च सर्वेषां धातूनां भिन्ना भिन्ना शक्तिरिति सिद्ध्यति । फले व्यापारे च धातुपदस्य द्विधा त्रिधा शक्तिः । तिङर्थास्तु आश्रयाः, फलाश्रया व्यापाराश्रया इति । अत्र फलापेक्षया व्यापारः प्रधानः, तिङर्थोः धात्वर्थे विशेषणं स्मृतः । अत्र च एकशेषेण स्मृताश्च स्मृतश्च इति स्मृताः । अतः फलव्यापारयोर्धातुःस्मृतः, आश्रये तु तिङर्थाः स्मृता इत्यत्र बहुत्वं च सङ्गच्छते । अत्र जरन्नैयायिकानां मीमांसकानामभिनवानाञ्च दार्शनीकानां मतमन्थनेन सुप्रसिद्धस्य धात्वर्थस्य समालोचनमत्र वरीवर्ति ।*

**शब्दकुञ्जी** : धात्वर्थः, फलम् व्यापारः, तिङर्थः, खण्डशः, वाचकः

## विषयपरिचयः

वैयाकरणमते स्फोटस्यैव वाचकत्वम् । स्फोटश्च– स्फुटति– प्रकाशतेऽर्थोऽस्मादिति स्फोटोऽर्थवाचकः शब्दः (मिश्रः, आद्याप्रसादः,वि. सं.२०४५ सावित्रीटीकायाम् पृ.सं २) ।

स च अष्टविधः वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटश्च। तत्र स्फोट एक एव शब्दात्मको ब्रह्मरूपः स च वर्णादिरूपव्यञ्जकभेदात् तत्तत्संज्ञां लभते ।

उक्तेषु स्फोटेषु वाक्यस्फोटस्यैव मुख्यवाचकत्वम्, (नागेशभट्टः वि.सं २०४७ पृ.सं ३) अन्ये स्फोटाः शास्त्रीयकार्यनिर्वाहकाः । कल्पितान्वयव्यतिरेकाभ्यां कल्पितार्थवन्त एव । तत्र वाक्येषु पदकल्पना पदेषु प्रकृतिप्रत्ययादिकल्पना इति प्रकृतिस्फोटः प्रत्ययस्फोटश्च वर्णस्फोटशब्देन उच्यते। " उणादयो बहुलम्" (पा.सू.३।३।१ पृ.सं ६४६) इति सूत्रे "नाम च धातुजमाह निरूक्तेः," व्याकरणे "धातुजं नामेति भाष्यादिप्रामाण्याद् सर्वेषामेव शब्दानां धातुजन्यत्वं सिद्ध्यति ।

तेषां शब्दानां मूलभूतस्य धातोः कोऽर्थः? इत्यत्र विवदन्त एव तत्तत्सिद्धान्तानुसारिणः । तत्र केचन फलमात्रं धात्वर्थः, व्यापारः प्रत्ययार्थः,(नागेशभट्टः, वि.स.२०४६,वैयाकरणसिद्धान्तलघुमञ्जूषायाम् पृ.५३१) फलव्यापारौ धातुवाच्यौ, आख्यातार्थो भावना केचित्तु फलमात्रं धात्वर्थः, आख्यातार्थः कृतिः तत्रैव केचन फलव्यापारौ धातुवाच्यौ अख्यातार्थः कृतिरिति स्वीकुर्वन्ति। तत्र फलमात्रं धात्त्वर्थो व्यापारः प्रत्ययार्थ इति प्रथमपक्षो मीमांसकानाम् अस्ति ।

## समस्याकथनम्

बहुभिराचार्यैर्धात्वर्थविषये नैकविधाः समस्याः समुपस्थापिताः स्वस्वमतानुसारं समाधानार्थं प्रयतमानाश्च सन्ति । अस्मिन् आलेखे एतासामेव समस्यानां सम्प्रति अध्ययनं क्रियते ।

क) सकलशब्दकारणीभूतस्य धातोरर्थःकः?

ख) मतान्तराणि कानि ?

ग) वैयाकरणराद्धान्ते पौरस्त्यानां मतं किम् ?

घ) भूषणसारकारमते धात्वर्थः कः?

ङ) शाब्दबोधश्च केषां केषां मते कः कः फलति ?

## उद्देश्यकथनम्

धात्वर्थसम्बद्धेषु बहुषु ग्रन्थेषु आलेखेषु च पौरस्त्यैः, विद्वद्भिः विचारेषु विहितेष्वपि संक्षेपेण तद्बोधाय लेखसन्दर्भो नैव दृश्यते इत्यध्ययनस्य सूत्ररूपेण इमानि उद्देश्यानि भवन्ति । तानि च यथा –

क) धात्वर्थविवेचनम्

ख) पूजितानां जरदजराणञ्चं मीमांसकानां मतप्रदर्शन्

ग) नैयायिकानां मतभेददर्शनम्

घ) समेषां मतालोचनेन स्वमतस्थापनम्

ङ) शाब्दबोधविषयकदिग्दर्शनम्

## पूर्वकार्यस्य समीक्षणम्

धात्वर्थविषये विविधाचार्यैर्बहुधा परिशीलनं कृतमस्ति । वैयाकरणानां राद्धान्ते वाक्यस्फोटस्य निष्कर्षत्वादयं विषयो विभिन्नदृष्ट्या विचारितेऽपि अपूर्णो दृश्यते सर्वो हि निराकांक्षज्ञानजनकवाक्यार्थः क्रियया परिसमाप्यते । तस्याः क्रियायाः परिकल्पना धातुं विना न सम्भवति एतस्मात् कारणात् पौरस्त्याचार्यैर्विचारितेऽप्ययं विषयः पुनःपौन्यं विचारणमावश्यकमिति धिया विशेषतया नैयायिक – मीमांसकानां मतालोचनप्रदर्शनमत्र कृत्वा वैयाककरणानां मते धात्वर्थानुशीलनं शाब्दबोधस्य दिग्दर्शनञ्च विहितम् । प्राच्यमतस्य पूर्वपक्षपूर्वकं नव्यमतस्योत्तरपक्षं विधाय वैयाकरणेतराणां मतान्तरालोचनमस्य शोधस्याऽपूर्वं चिन्तनं विद्यत इति ।

## अध्ययनविधिः

अस्याध्ययनस्य सौकर्यातिशयार्थं मुख्याऽध्ययनसामग्रीसङ्कलनाय च विशेषरूपेण पुस्तकालयीयाध्ययनविधिरङ्गीकृतः । यथावश्यकं संवाद– व्याख्या– विश्लेषणादिविधयः तथा क्वचित् –तुलना– प्रश्नोत्तर– चिन्तन– मननादिविधयश्च अवलम्बिताः सन्ति ।

## अध्ययनस्य क्षेत्रं सीमा च

अस्य आलेखस्य मुख्यं क्षेत्रमस्ति यद् वैयाकरणानां मते धात्वर्थः कः ? प्रसङ्गसङ्गतिमनतिक्रम्य मतान्तरालोचनमपि, आवश्यकत्वात् तेषां प्रमुखसिद्धान्तप्रदर्शनपूर्वकं मीमांसकानां मिश्रमतं खण्डदेवमतं प्रभाकरमतमेवमेव नैयायिकानां प्राचीनानां नव्यनैयायिकानां पुनश्च प्राचीनवैयाकरणानां नव्यवैयाकरणानाञ्च मते धात्वर्थाः के ? प्रकृते क्षेत्रान्तर्गताः सन्ति । तदतिरिक्ता विषया सीमरूपा ज्ञेयाः । अनुसन्धानमिदं स्वक्षेत्रे प्रवर्तते तदतिरिक्तेषु क्षेत्रेषु प्रवर्तनार्थं नैव प्रभवति ।

### मीमांसकमतम्

धात्वर्थं फलमेव केवलं आख्यातार्थश्च व्यापारोऽस्ति । व्यापारे धात्वर्थफलम्, अनुकूलत्वसम्बन्धेन विशेषणं भवति, तेन व्यापारमुख्यविशेष्यकः शाब्दवोधो जायते । एवञ्च लडाद्यर्थो वर्तमानत्वादिकालानामपि व्यापार एव अन्वयः एकपदोपात्तत्वात् । तथा च चैत्रः तण्डुलं पचति इति वाक्यात् तण्डुलभाव्यिका (तण्डुलसाध्यिका) पाककरणिका चैत्रकर्तृका भावना इति बोधः । कर्मणि प्रत्ययेऽपि आख्यातार्थो भावना एव, मुख्यविशेष्यता भावनायामेव तिष्ठति । व्यापारो मीमांसकमते भावना वर्तते । (मिश्रः, सन् १९८३ पृ.सं.२५७) वैयाकरणभूषणसारे उक्तम् “व्यापारो भावना सैवोत्पादना सैव च क्रिया” (कौण्डभट्टः२०४५,पृ.सं ३३)

नव्यमीमांसकास्तु फलव्यापारौ धात्वर्थौ।उभयत्र एका शक्तिः।अत एव पदार्थैकदेशान्वयशङ्कापि न।तत्र जन्यजनकभावः संसर्गः व्यापारमुख्यविशेश्यकबोधश्च । तत्रैव कर्मातिरिक्तकारकाणामन्वयः । कर्मकारकस्य च कर्तृपदसमभियव्याहारे फले अन्वय इत्याहुः। न च फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवान् इति प्रयोगापत्तिः, यथा संयोगरूपफलस्य ग्रामे विद्यमानत्वात् ग्रामः संयोगवानिति प्रयोगो भवति, तथैव धात्वर्थसंयोगरूपफलस्य ग्रामे विद्यमानत्वात् । अत एव उक्तं कौण्डभट्टेन –“फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवान् इति प्रयोगापत्तिः संयोगाश्रयत्वात् ” इति । तस्मात् फलमात्रस्य धात्वर्थत्वं न सम्भवतीति वाच्यम् तत्र ल्युट्प्रत्ययस्य व्यापारवाचकत्वेन गमनपदस्य उत्तरदेशसंयोगानुकूलव्यापारार्थकत्वेन ग्रामे तादृशार्थस्य वर्तमानत्वात् दोषाभावः । तस्मात् फलमात्रस्य धात्त्वर्थत्वे न कश्चन दोष इति मण्डनमिश्रस्य उद्घोषः ।

**मीमांसकानां मतखण्डनम्**

फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवान् इति प्रयोगापत्तेः कथञ्चित् पूर्वोक्तप्रकारेण वारणसम्भवेऽपि गम्यर्थवान् ग्राम इति प्रयोगापत्तिः, गम्धात्वर्थसंयोगाश्रयो ग्राम इति इष्टप्रयोगानुपपत्तेश्च । उक्तञ्च मण्डनमिश्रस्य मतं खण्डयता खण्डदेवेन" गम्यर्थवान् ग्राम इति प्रयोगस्य एवमपि आपत्तेः गम्यर्थजन्यसंयोगाश्रयो ग्राम इति प्रयोगानापत्तेश्च ।

किञ्च प्रत्ययस्य व्यापारार्थकत्वे "ल कर्मणि च भावे चाकर्मकेभ्यः" पा.सू. ३।४।६९ पृ.सं ३८८) इति कर्तरि कर्मणि भावे च लकारविधायकपाणिन्यनुशासनविरोधापत्तिः, तेन सूत्रेण कर्तरि कर्मणि लकारविधानद्वारा तयोरेव आख्यात–प्रत्ययार्थत्वोपपादनात् । न हि तेन व्यापारस्य प्रत्ययार्थता लभ्यते ।

गच्छति, गमिष्यति, गमनवान् इत्यादौ प्रतीयमाने व्यापारे अनेकप्रत्ययानां शक्तिकल्पने गौरवम्, शक्ततावच्छेदकनानात्वाच्च । अतो लाघवात् धातोरेव व्यापारे शक्तिः स्वीकरणीया न तु प्रत्ययानामिति ।

ननु सूत्रे भावप्रधाननिर्देशेन लकाराः कर्मत्वे च विधीयन्ताम्। कर्तृत्वं कृतिरिति कृञो यत्नवाचकत्वेन तत्प्रकृतिककर्त्रर्थक–तृजन्तकर्तृशब्दस्य कृत्याश्रयवाचकतया तदुत्तरभावप्रत्ययेन प्रकृत्यर्थप्रकारीभूतकृतिरूपधर्मबोधनादिति एवं कर्मत्वं फलं कर्मशब्दस्य धात्वर्थफलाश्रयरूपतया तदुत्तरप्रत्ययेन प्रकृत्यर्थप्रकारीभूतः फलरूपार्थबोधनाच्च न सूत्रेण सह विरोधः, अस्ति । तस्मात् व्यापारस्य प्रत्ययार्थत्वे निर्वाधमिति चेत् मन्यते तदा अपरदोषो दीयते ।

एवं व्यापारस्य धात्वर्थत्वे गच्छति इत्यत्र फूत्कारादिप्रतीत्यभावदर्शनात् , व्यापारविशेषबोधं प्रति तत्तद्धातूनां समभिव्याहारस्य कारणतावश्यमेव कल्पनीया, एवञ्च व्यापारस्य धात्वर्थवादिमतेऽपि अनेककार्यकारणभावकल्पनायां गौरवम् तथा च गौरवस्य उभयोर्मते विद्यमानत्वेन गौरवात् फलस्य धात्वर्थत्वं न सम्भवतीति कथनमयुक्तमेव इति चेत् उच्यते –

पचति पक्ष्यति पक्ववानित्यादौ फूत्कारादिव्यापारः प्रतीतये तत्र अनेकप्रत्ययानां भिन्ना भिन्ना शक्तिकल्पनापेक्षया एकस्य धातोरेव शक्तिकल्पनोचिता लाघवात् । यतो हि प्रयोगत्रये धातुरेक एव वर्तते ।

पुनश्च मीमांसकैरुच्यते ननु अनेकधातूनां तत्र शक्तिकल्पने तथैव गौारवम् । अयमाशयः– फूत्कारादेः प्रत्ययार्थत्वे गच्छति इत्यादौ प्रत्ययस्य समानत्वेन फुत्कारविषयकबोधवारणाय आख्यातार्थफूत्कारत्त्वावच्छिन्नविषयकशाब्दबोधं प्रति पच्धातुसमभिव्याहृततिङ्पदजन्योपस्थितिः कारणम्, इति एककार्यकारणभावकल्पनेऽतिगौरवम् । अतो धातोरेव शक्तिकल्पना ज्यायसी ।

ननु सामान्यतो धातोः व्यापारवाचकत्वे पूर्वोक्तदोषस्य दुरुद्धरत्वेन तत्तद्धातुसमभिव्याहारस्य कारणत्वमवश्यमेव वक्तव्यम् । तथा च व्यापारस्य प्रत्ययवाच्यत्वमतश्च धातुवाच्यत्वमतेऽपि समानमेव गौरवम्, अतः, अपरदोषो दीयते वैयाकरणैः, यदि प्रत्ययवाच्यो व्यापारः स्वीक्रियते तर्हि तव मते अयं धातुः सकर्मकः अयं धातुः, अकर्मक इति व्यवस्था न भविष्यति, यतो हि "फलव्यधिकरणव्यापारवाचकतावान् धातुः सकर्मक," एवं "फलसमानाधिकरणव्यापारवाचकतावान् धातुः अकर्मक"(नागेशभट्टः, वि.सं.२०४१,पृ.सं १०१) इति व्यवस्था अस्ति किन्तु भावना मीमांसकानां मते तु व्यापारस्य धातुवाच्यत्वाभावात् फलव्यधिकरणव्यापारवाचकता वा फलसमानाधिकरणव्यापारवाचकता दूरमेव स्यात् । तस्मात् व्यापारस्य प्रत्ययवाच्यत्वं मीमांसकानां मतं न समीचीनं प्रतीयते । व्यापारस्य धातुवाच्यत्वे स्ववाच्यव्यापाराधिकरणभिन्नवृत्तिः फलवाचकत्वं सकर्मकत्वं प्रत्ययार्थत्वे तु सा न स्यात् ।

पुनश्च व्यापारस्य प्रत्ययार्थत्त्वेऽपि सकर्मकाकर्मत्वव्यवस्थां समुपपादयति प्रत्ययार्थव्यापारव्याधिकरणफलवाचकत्वं सकर्मकत्वं तत्सामानाधिकरणफलवाचकत्वमकर्मकत्वम् । एवं प्रत्ययार्थव्यापाराश्रयत्वं कर्तृत्वम् ।

ननु प्रत्ययार्थव्यापाराश्रयत्वं कर्तृत्वमिति नये घटं भावयति घटस्य कर्तृत्वाभावात् " गतिबुद्धि प्रत्यवसानार्थशब्दकर्माकाणामणि कर्ता स णौ"(पा.सू. १।४।५२। पृ.सं १६४) इति सूत्रेण कर्मत्वं न स्यात् तेन कर्तुरेव कर्मत्वविधानात् । न च घटं भावयतीत्यादौ णिजर्थव्यापारव्याधिकरणफलाश्रयत्वेन घटादेः कर्मत्वमिति वाच्यम् । अभिधानानभिधानव्यवस्थोच्छेदापत्तेः । न च व्यापारेण आश्रयाक्षेपात् कर्तुरभिधानं कर्माख्याते च प्रधानेन फलेन स्वाश्रयाक्षेपात् कर्मणोऽभिधानमिति वाच्यम् । जातिशक्तिवादे जात्याक्षिप्तव्यक्तेरिव आश्रयप्राधान्यापत्तौ "क्रियाप्रधानमाख्यातम्" इति यास्कवचसा विरोधापत्तेः ।

**प्रभाकरमतम्**

मिश्रास्तु फलमात्रं धात्वर्थ आख्यातार्थो भावना इति स्वीकुर्वन्ति तत्र फलमात्रस्य धात्वर्थत्वं तु खण्डितमेव । आख्यातार्थो भावनेत्यपि न युज्यते, लः कर्मणि च भावे चाकर्मकेभ्य इति सूत्रेण सह विरोधात् । किञ्च "कर्तरि कृत्" (पाणिनिः, सन् १९९७, अ.३ पा.४ सू.सं. ६७) इत्यनुशासनात् कृदन्तस्थले यदि कृतां कर्तृवाचकत्वं भावनाया आक्षेपेण बोध इति स्वीकुर्वन्ति, तर्हि इह आख्यातार्थः कर्ता भावनायाश्च आक्षेपेण बोध इति स्वीक्रियताम् किं शक्तिकल्पनयाः, न चाक्षेपे तस्य अप्राधान्यापतिः, जातिशक्तिवाद आक्षिप्तायाः व्यक्तेरिव तस्यापि प्राधान्योपपत्तेः । अस्यायं भावः – यदि कर्तरि कृत् , इत्यत्र एव लः कर्मणि च भावे चाकर्मकेभ्यः इत्यत्र कर्तरि इति अनुवर्तते, तत्र यदि पाचको देवदत्तः इत्यत्र विक्लित्यनुकूलभावनाश्रयाऽग्निो देवदत्तः इति सामानाधिकरण्येन अन्वयलाभाय कर्तृपदम् आश्रयबोधकम् इति लब्धस्य आश्रयरूपस्य अर्थस्य परिरक्षणरूपं क्षेमम् । अलब्धाया भावानाया लाभाय आक्षेप इति योगश्च आश्रीयते तदा अत्रापि तथैव योगक्षेमं स्यात् बीजाभावात् । यदि तु लः कर्मणि इत्यत्र धर्मपरं तदा कर्तरि कृत् इत्यत्रापि धर्मपरमेव स्यात् इत्याश्रय (कर्ता) आक्षेपलभ्यः स्यादिति कर्तृकर्मकृताम् आश्रयबोधकत्वम् इति मीमांसकानां सिद्धान्तस्य भङ्गापतिः स्यादित्याह तर्हि कृतामपि कर्तृकर्मादिवाचित्वं न सिद्धयेत् इति मूले उत्तम् । न हि गोधा सर्पणेन अहिर्भवति इति भाष्यप्रामाण्यात् उभयत्रापि तुल्यार्थकत्वमेव स्यादिति भावः । (पतञ्जलि सन् १९८७ पृ.सं ३९८)

उक्तस्थले ननु शब्दाधिकाराश्रयणात् कर्तृपदं धर्मपरं स्यात् अत्र चेन्न प्रमाणाभावः, तिङभिप्रायेण शक्तिः ( कर्मत्वादिरूपा ) कारकम् कृदभिप्रायेण शक्तिमत् (कर्मादि) कारकम् इति भाष्यस्यैव मानत्वमिति चेन्न, तदृशाभिप्रायस्य भवत्कपोलकल्पितत्वात् । ननु कृतिसामानाधिकरण्येन अन्वयदर्शनाद् धर्मिपरत्वम् इत्यत आह– अपि च मीमांकानां कृतामिव आख्यातानामपि कर्तृवाचित्वमस्तु, भावनाया एव आक्षेपेण कृदादिवत् प्रतीतिसम्भवे वाच्यत्वं माऽस्तु । तथा च मीमांसकानां मते यथा कृदर्थकर्त्राऽऽक्षिप्तभावना शाब्दबोधे भासते तथैव अत्रापि तिङर्थकर्त्राऽक्षिप्तभावनायाः शाब्दबोधविषयत्वं स्यादिति भावः । अत आख्यातार्थो भावनेत्यपि न युज्यते । खण्डितोऽयं सिद्धान्तो महता समारम्भेण कौण्डभट्टैः । तथा चोक्तम् –"अपि च मीमांसकानां कृतामिवाख्यातानामपि कर्तृवाचित्वमस्तद्र, भावनाया एवाक्षेपेण कृदादिवत् प्रतीतिसम्भवे वाच्यत्वं मास्तद्र" इति ।

व्यापारमात्रं धात्वर्थ इति मीमांसकानां सिद्धान्तोऽपि न समीचीनः, यतो हि – यदि व्यापारत्वसामान्येन व्यापारस्य धातुवाच्यत्वं स्वीक्रियते तदा सर्वेषां धातूनां समानार्थकत्वापत्तिः । यदि क्रियात्वेन वाच्यता व्यापारस्येति पक्षः ? तदा त्यजिगम्योः समानार्थतापत्तिः, त्यजिधात्वर्थरूपायाः पूर्वदेशविभागानुकूलक्रियाया एव उत्तरदेशसंयोगानुकूलक्रियात्वात्, तस्य गम्यर्थत्वेन पर्यायतापत्तिः स्पष्टैव । तत्र क्रिया च पादसञ्चारादिरूपा । तत्तत्रूपेण वाच्यतायां तु अनेकशक्तिकल्पनायां गौरवात् । अतो व्यापारमात्रस्य धात्वर्थत्वं न सम्भवति ।

**आचार्यखण्डदेवमतम्**

मीमांसाशास्त्रपारावारीणः खण्डदेवस्तु विक्लितिजनकव्यापारसमूहरूपपाकपदार्थे विद्यमानं पाकत्वादिसामान्यमेव धात्वर्थ इति स्वीचकार । उक्तञ्च –“अतोऽनुभूयमानं पाकत्वं यागत्वादिकमेव तत्तत्फलोपधायकतावद् व्यापार वृतिसामान्यं पच्यादिशक्यतावच्छेदकाभावात्, पचति, पाके, यतते, पाकं करोति इत्यादिविवरणाद् आख्यातस्य यत्नत्वमेव शक्यतावच्छेदेकम् इति ।

**खण्डदेवमतखण्डनम्**

खण्डदेवमते सामान्यधातोः कोऽर्थ? इत्यत्र विचारो न प्रकटितः यदि तत्तद्धातूनां तत्तदर्थे शक्तिः कल्प्यते चेत् धातोर्नानात्वेन अनेकशक्तिकल्पनायां गौरवम् ।

आख्यातस्य यत्नार्थकत्वमप्युक्तमेव “लः कर्मणि च भावे चाकर्मकेभ्यः” इति सूत्रस्य कर्तृकर्मणोरेवाख्यातस्य शक्तिनियामकत्वात् । पाके, यतते, पाकं करोतीत्यादिविवरणानुरोधादपि तस्य यत्नार्थकत्वं न सम्भवति यतो हि – विवरणेऽपि आगतस्य तिप्रत्ययस्य कोऽर्थ इति जिज्ञासायां यत्नाश्रयस्यापि वक्तुं शक्यत्वात् “देवदतः पचति” इत्यत्राभेदान्वयोऽपि न स्याद् यत्नार्थकत्ववादिमते ।

किञ्च “स्ववाच्यवाचकत्वरूपतिङ्समाधिकरणे प्रथमाविभक्तिर्भवतु”, “इत्यर्थकात् तिङ्समाधिकरणे प्रथमा इति वार्तिकविरोधात् आख्यातस्य यत्नार्थकत्वं न स्वीकरणीयम् । अपि तु आख्यातस्य कर्तृकर्मवाचकत्वमेव युक्तम् ।

**नव्यनैयायिकमतम्**

फलव्यापारयोः धात्वर्थत्वं स्वीकुर्वन्ति । आख्यातार्थश्च कृतिः न तु कर्ता, प्रथमान्तपदादेव तल्लाभात् अनन्यलभ्यस्यैव शब्दार्थत्वात् । कृतौ शक्तिस्वीकारे लाघवमपि । यतो हि – कर्तरि शक्तिः स्वीक्रियते चेत्तदा कर्तृत्वं नाम कृत्याश्रत्वमिति वक्तव्यम्, तच्च कृतिरूपम् प्रकृतिजन्यवोधे प्रकारीभूतोऽर्थः भावप्रत्ययार्थ इति नियमात् । एवञ्च कृतिराश्रयभेदात् अनेका, तस्या एव शक्यतावच्छेदकत्वे गौरवम् शक्यतावच्छेदकभेदात् शक्तिनानात्वप्रसिद्धाच्च । प्रथमान्तार्थमुख्यविशेष्यकश्च शाब्दबोधः, तत्र फलस्य व्यापारे व्यापारस्य च कृतौ विशेषणता । धात्वर्थव्यापारो आख्यातार्थः कृति प्रथमान्तार्थे विशेषणं भवति । यथा “रामः ग्रामं गच्छति” अस्मिन् कर्तृप्रत्यये ग्रामाभिन्न उत्तरदेशसंयोगानुकूलव्यापारानुकूलकृतिमान् रामः । रामेण ग्रामो गम्यते – अस्मिन् कर्मणि प्रत्यये रामवृत्तिकृतिजन्यगमनजन्यफलशालीग्रामः, एतद् प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधो भवति । उत्तञ्च नैयायिकमतमुपपादयता नागेशेन “यत्तु तार्किकाः- फलव्यापारौ धात्वर्थः, लकाराणां कृतौ एव शक्तिर्लाघवात्, न तु कर्तरि, कृत्तिमतः कर्तृत्वेन तत्र शक्तौ गौरवात् प्रथमान्तपदेनैव तल्लाभाच्च” इति ।

**प्राचीनवैयाकरणमतम्**

प्राचीनवैयाकरणा भट्टोजिदीक्षिता भूषणसारकारा अन्ये च एकवृन्तगतफलद्वयन्यायेन धातोः फलनिरूपिता च पृथगुपस्थितिप्रयोजिकैकैव खण्डशः शक्तिरिति स्वीकुर्वन्ति । अत एव फलव्यापारयोः धातुरित्यत्र द्विवचनोक्तिः संगच्छते । खण्डशः शक्तिस्वीकारादेव “स्तोकं पचति” इत्यादौ स्तोकपदार्थस्य धात्वर्थे फलेऽन्वयः सम्भवति विशिष्टे शक्तिस्वीकारे तु फलस्य धात्वर्थैकदेशात् तत्रान्वयो न स्यात् (कौण्डभट्टः, वि.सं.२०४५,पृ.सं १९) “पदार्थ –पदार्थेनान्वेति न तु पदार्थैकदेशेन” (गदाधरभट्टाचार्यः, वि.स.२०४१ पृ.सं ७) इति न्यायात् । अत एव “ऋद्धस्य राजपुरूषः” घटत्वे नित्यान्वयविवक्षया “नित्यो घट” इति च न प्रयोगः ।

ननु हरिशब्दादुपस्थितयोः विष्णुसिंहयोः परस्परान्वयबोधवारणाय तत्पदजन्य तद्धर्मावच्छिन्न विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति अपरपदजन्योपस्थितिः कारणमिति कार्यकारणभावस्य अवश्यमेव स्वीकर्तव्यतया

एकस्मादेव धातोरुपस्थितयोः फलव्यापारयोः न स्यात्। अत एव उक्तं गदाधरेण– "शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते" (गदाधरभट्टाचार्यः, वि.सं २०४१ पृ.सं १) इति चेद् ? अत्रोच्यते व्युत्पत्तिवैचित्र्येण क्वचिदेकपदोपस्थितयोरपि पदार्थयोः परस्परान्वयस्य सर्वसम्मतत्वेन तस्य नियमस्य असार्वत्रिकत्वात् । अत एव "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" (पा.सू.२/३/४६ पृ.सं१५६) इति सूत्रे मात्रपदस्य अवधारणमर्थः। उक्तञ्च मात्रशब्दस्येति तस्य च अवधारणरूपोऽर्थ । मात्रं कात्स्न्र्येऽऽवधारणे इत्यमरः इति । (सिंह, अमरः वि.सं.२०३१ नानार्थवर्गः पृ.सं ८२) तत्रावधारणञ्चान्ययोगव्यवच्छेदः । योग सम्बन्ध, व्यवच्छेदाऽभावः, एवञ्च अभावे सम्बन्धस्य प्रतियोगीतया अन्वयो भवति तस्मात्– व्यापारस्य पृथक्शक्तिस्वीकारे नास्ति काचन विप्रतिपत्तिः ।

नन्वेवं हरिशब्दवाच्ययोरर्थयोरपि परस्परं कथं नान्वयः इति चेत् ? उच्यते तत्र हरिशब्दस्य प्रत्येकस्मिन् अर्थे पृथक् पृथक् शक्तिः अतः "सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति" इति नियमात् तत्र एकस्मिन्नेव काले हरिशब्दाद्, अर्थद्वयस्य उपस्थितिः शक्त्या भवत्येव न हि । अत एव तत्र अर्थान्तरस्य उपस्थितिर्व्यञ्जनया वृत्या भवति, सर्वाभिधामूलाव्यञ्जना इति साहित्यिकानां सम्मतिः । उक्तं च अभिधामूलाया व्यञ्जनायाः स्वरूपं प्रतिपादयता आचार्यमम्मटेन –

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।**

**संयोगाद्यैरवाच्यार्थधीकृद्व्यापृत्तिरञ्जनम्** ॥ (मम्मटः, सन् १९८० पृ.सं. ७२।७३ )

अयम्भावः– नानार्थकस्य शब्दस्य एकस्मिन्नर्थे संयोगादिभिः शक्तौ नियन्त्रितायाः तद्भिन्नार्थस्य प्रतीतिर्व्यञ्जनया भवति न तु शक्त्या इति । एवञ्चानेन सिद्धयति यद् नानार्थकैरपि शब्दैः युगपन्नानार्थस्योपस्थितिः शक्त्या न भवति । तस्माद् हरिशब्दादिस्थले नार्थद्वयस्य परस्परमन्वयापत्तिः।

फलव्यापारयोरपि धातोः युगपदुपस्थितिः न सम्भवतीति नाशङ्कनीयम् । सकृदुच्चरितेति न्यायः विभिन्नशक्त्योपस्थितावेव प्रवर्तते, यत्रैकयैव शक्त्या एकवृन्तगतफलद्वयन्यायेन पदार्थद्वयस्योपस्थितिस्तत्र नायं नियमः, अत एव आख्यातपदोपस्थापितयोर्नैयायिकानां कृतिर्वर्तमानादिकालयोः वैयाकरणानां कर्तृसंख्ययोश्च परस्परान्वयबोधः संगच्छते । ननु फलव्यापारयोः खण्डशः शक्तिस्वीकारे पृथगुपस्थिते संयोगरूपफले भेदान्वयो विवक्षया गमनं न स्पन्द इति प्रयोगस्य प्रामाण्यापत्तिः स्यादिति चेत् न, अन्तरङ्गत्वात् पूर्वमुपस्थितयोः फलव्यापारयोरेवान्वयः तत्पश्चादेव फले पदार्थान्तरस्य अन्वयो भवति । एवञ्च फलस्य व्यापारे विशेषणे जाते तत्र पदार्थान्तरस्य भेदान्वयो न सम्भवति "गुणानाञ्च परार्थत्वात् असम्बन्धः समत्वात्" स्यात् इति न्यायात् ।

## नव्यवैयाकरणानां मतम्

नागेशास्तु फलविशिष्टे व्यापारे व्यापरविशिष्टे फले च धातोः शक्तिं स्वीकुर्वन्ति । अत एव तेषां मते कर्तृप्रत्ययस्थले व्यापारमुख्यविशेष्यकशाब्दबोधः तथा कर्मप्रत्ययस्थले फलविशेष्यकव्यापारविशेषणकशाब्दबोधो भवति। अर्थात् फलावच्छिन्नव्यापरबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्। एवं व्यापारावच्छिन्नफलबोधे कर्मप्रत्ययसमभिव्याहतधातुजन्योपस्थितिःकारणम्।तत्रफलस्यव्यापारेवैशिष्टयमनुकूलत्वसम्बन्धेन,व्यापारस्यचजन्यत्वसम्बन्धेन फले वैशिष्टयं बोध्यम् । भणितञ्च – तस्मात् फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्तिः कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामक इत्याहुः । (नागेशभट्टः, वि.सं.२०४५,पृ.सं १०१)

एवं स्वाभिमतं विशिष्टशक्तिवादं समर्थयता, पृथक्शक्तिवादं दूषयता नागेशेन खण्डशः शक्तिवाद इमे दोषा उपन्यस्ता :

१. उद्देश्य विधेयभावेनान्वयापत्तिः ।

२. कार्यकारणभावद्वयकल्पनं ।

३. अर्थद्वये शक्तिद्वयकल्पनम् ।

४. बोधजनकत्व सम्बन्धद्वयकल्पनमिति गौरवम् ।

**उद्देश्य विधेयभावेनान्वयापत्तिः** – तत्र प्रथमस्तावद् – फले व्यापारे च खण्डशः शक्तिस्वीकारे फलव्यापारयोः परस्परमुद्देश्यविधेयभावेनान्वयापत्तौ व्यापारोद्देश्यकफलविधेयकस्य, फलोद्देश्यकव्यापारविधेयकस्य च बोधस्यापत्तिः, उद्देश्यविधेयभावेनान्वये पुथगुपस्थितेः कारणतया, तस्याश्च पृथक्शक्तिवादे विद्यमानत्वात् "उक्तञ्च" फलव्यापरयोः पृथक् शक्तौ उद्देश्यविधेयभावेनान्वयापत्तिस्तयोः स्यात् पृथगुपस्थितयोस्थाऽन्वयस्यौत्सर्गिकत्वात् ।

अयम्भाव :– घटपदाद् घटघटत्वयोविर्शिष्टोपस्थितिः सत्वात् न तत्रोद्देश्यविधेयभावेनान्वयः अतो ज्ञायते यत्र विशिष्टोपस्थित्यभावः तत्रोद्देश्यविधेयभावेन अन्वयो भवति । अतो धातोरपि पथक् पृथगुपस्थितयोः फलव्यापरयोः परस्परमुद्देश्यविधेयभावेनान्वयापत्तिः ।

वस्तुतस्तु– उद्देश्यविधेयभावेनान्वयं प्रति विभिन्नपदजन्योपास्थितिरेव कारणम्, एक पदात् विभिन्नशक्तिज्ञानजन्योपस्थितपदार्थद्वयस्योद्देश्यविधेयभावेनान्वये तु प्रमाणाभावः, दृष्टान्ताभावश्च । अत एव हरिपदादुपस्थितयोः सूर्यसिंहयोर्न परस्परमुद्देश्यविधेयभावेन अन्वयः । अतः पृथक शक्तिवादेऽपि नायं दोष युक्तियुक्त इति ।

**कार्यकारणभावद्वयकल्पनम्**

फलत्वावछिन्नप्रकारतानिरूपितव्यापारविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति कर्तृप्रत्ययसमभिव्याह्तधातुजन्योपस्थितिःकारणम्,व्यापारत्वावच्छिन्नप्रकारतानिरूपितफलविशष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति कर्मप्रत्ययसमभिव्याह्तधातुजन्योपस्थितिः कारणमिति । कार्यकारणभावद्वयकल्पने गौरवं पृथक् शक्तिवादिमत इति नागेशाशयः।

**अर्थद्वये शक्तिद्वयकल्पनम्**

अर्थद्वये शक्तिद्वयकल्पने नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदेकैकधर्मवत्वरूपनानार्थत्वं धातोः स्यात् पृथक् शक्तिवादिमते यथा हर्यादयः शब्दाः नानार्थकाः तथा धातुरपि नानार्थक इति व्यवहारापत्तिः ।

**सम्बन्धद्वयकल्पनम्**

फलनिरूपितव्यापारनिरूपितस्वविषयकबोधजनकत्वरूपसम्बन्धद्वयकल्पने गौरवम् । एवञ्च अनेकगौरवग्रस्तत्वात् पृथक्शक्तिवादो न श्रेयस्कर अतो विशिष्ट एव शक्तिः स्वीकरणीया इति नागेशाभिमतिः। उक्तञ्च – फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्,व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्, इति कार्यकारणभावद्वयकल्पनम् । धातोरर्थद्वये शक्तिद्वश्कल्पनं धातोर्बोधजनकत्वसम्बन्धद्वयकल्पनं च महद्गौरवम् ।

**फलम्**

तत्र किं नाम फलमिति जिज्ञासायामुक्तं कौण्डभट्टेन– फलं विक्लित्यादिः । इति तस्यायम्भावः यद्यपि –

**यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ।**

**तत्प्रधानं फलं तेषां न लाभादिप्रयोजनम् ॥** (भर्तृहरिः सन् २०१६,वाक्यपदीये पृ.सं ७३५)

इति भर्तृहर्युक्तिदिशा स्वरितञितः कर्त्रभिप्राये क्रियाफले पा.सू.१।३।७२, पृ.सं३९१) इति सूत्रे यमुद्दिश्य धात्वर्थक्रियायां

प्रवृत्तिस्तत् फलं क्रिया फलेन गृह्यते तथाप्यत्र तादृशफलस्वीकारे सकर्मकत्वादिव्यवस्था न स्यात् । यतो हि धात्वर्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम् । तत्समानाधिकरणव्यापारवाचकत्वञ्चाकर्मकत्वमिति व्यवस्था । (नागेशभट्टः, वि.सं २०५४, पृ.सं. १०४)

एवञ्च धात्वर्थक्रियाप्रवृत्त्युद्देश्यरूपफलस्य अत्र धातुवाच्यत्वे "पत्येशेते" इत्यादौ शीङ्धातोरपि सकर्मकत्वापत्तिः।यतो हि तत्र धात्वर्थव्यापारःस्त्रियाम्, तदुद्देश्यं फलञ्च पत्यौ इति, फलव्यधिकरण व्यापारवाचकत्वात् । तस्मादत्र धातुवाच्यं फलं धात्वर्थजन्यत्वे सति धातुजन्योपस्थितीयविषयताश्रयत्वम् । एवं त्यजिधातौ संयोगस्य गमिधातौ विभागस्य न फलत्वम् , तत्र संयोगविभागयोस्तद्व्यापारजन्यत्वेऽपि धातुजन्योपस्थितीयविषयताश्रयत्वाभावात् ।

उक्तञ्च नागेशेन – विभागजन्यसंयोगादिरूपे पतत्यादिधात्वर्थे – विभागसंयोगयोः फलत्व वारणयोभयम् इति (नागेशभट्ट,वि.सं २०५४ पृ. सं ९६) तादृशञ्च फलं विक्लित्यादिरेवेति कौण्डभट्टाशयः।

**व्यापारः**

व्यापारस्य धात्वर्थत्वे विवादाभावेऽपि तत्स्वरूपे दृश्यते मतभेदः कौण्डभट्टनागेशयोः । तत्र कौण्डभट्टास्तु साध्यत्वेनाभिधीयमानायाः क्रियाया एव व्यापरत्वं स्वीकुर्वन्ति । भणितञ्च तैः– "व्यापास्तु भावनाऽभिधा साध्यत्वेन प्रतीयमाना क्रिया साध्यत्वप्रकारकप्रतीतिविषयत्वमेव व्यापार इति कौण्डभट्टाशयः भर्तृहरिणाऽप्युक्तम्–

**यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।**

**आश्रितकमरूपत्वात् सा क्रियेत्यभिधीयते ॥** (कौण्डभट्टः, २०४५,पृ.१०)

एवञ्च अनेन लक्षणेन ज्ञायते यत् व्यापाररूपा क्रिया द्विविधा सिद्धस्वभावा साध्यस्वभावा च तत्र साध्यस्वभावा क्रिया तिङन्तस्थले, सिद्धस्वभावा क्रिया कृदन्तस्थले प्रतीयते । साध्यस्वभावरूपा क्रिया तत्रैव भवति यत्र अस्या अन्वयिनी क्रिया का ? इति क्रियान्तराकांक्षा न भवति यथा पचति इत्यत्र प्रतीयमाना विक्लित्यनुकूलव्यापाररूपा क्रिया साध्यस्वभावा । तथा चोक्तं कौण्डभट्टेन तथा च क्रियान्तराकाक्षानुत्थापकतावच्छेदकरूपत्वं साध्यत्वम् ।

क्रियायाः साध्यत्वेन प्रतीयमानत्वेन प्रमाणन्तु अनुभव एव ।

तथा हि – पचति पाकः – अत्रोभयस्थले धात्वर्थः विक्लित्यनुकूलव्यापररूपोऽस्ति । किन्तु पाक इत्यत्र एतदन्वयिनी का ? इत्यन्वयित्वेन क्रियान्तरस्य आकांक्षा भवति, किन्तु पचति इत्यत्र क्रियान्तरस्य नापेक्षा, अतः पचति इत्यत्र क्रिया साध्यस्वभावा एव ।

यद्यपि पाक इत्यादावपि साध्यस्वभावा क्रिया प्रतीयते, अत एव पाक इत्यादिस्थले किं कर्तृकः किं कर्मकः पाक इत्याद्याकांक्षायाः, तत्र कर्त्रादिकारणा च अन्वयोपपत्तिः, अन्यथा तु साध्यक्रियायामेव तदन्वयस्य सिद्धान्तितत्वात्, सिद्धस्वभावक्रियायां तेषामन्वयानुपपत्तिरस्त्येव ।

एवञ्च पाक इत्यत्र पच्धातुवाच्या क्रिया साध्यस्वभावा, प्रत्ययघञादिवाच्या च सिद्धस्वभावा इति सिध्यति । उक्तञ्च भर्तृहरिणाऽपि –

**साधत्वेन क्रिया यत्र धातुरूपनिबन्धना ।**

**त्वभागस्तु यस्तस्याः स घञादिनिबन्धनः ॥** ( भर्तृहरिः,सन् २०१६, तृतीयकाण्डे पृ.स ४९८)

वस्तुतस्तु "साध्यत्वेन प्रतीयमाना क्रिया एव व्यापारः" इत्यत्र साध्यत्वं साधानाकांक्षोत्थापकतावच्छेदकरूपवत्वमेव । पाक इत्यादौ तु सिद्धत्वज्ञाने साध्याकांक्षावत् पचतीत्यादौ साध्याकाक्षा स्वाभाविकी। अत एव स्तोकस्य साध्यविशेषणत्वे स्तोकं पाकः सिद्धविशेषाणत्वे स्तोकः पाकः इत्युभयं सिद्धयति। न च पाक इत्यादौ साध्यसिद्धकिययोरन्वयानुपपत्तिः, न चाऽभेदेऽनादन्वयः सिद्धसाध्ययोरभेदस्य दुरूपपादत्वकादिति वाच्यम्,

स्ववृत्तियात्वरूपसामान्यधर्मवत्वेन अन्वये बाधकाभावात्। पचति पाकः, करोति, कृतिः, इत्यादौ धात्वर्थावगमाऽविशेषऽपि क्रियान्तरकाङ्क्षानाकाङ्काक्षयोर्दर्शनस्यैव मानत्वात्।क्रियान्तरा इत्यस्य अन्या क्रिया क्रियान्तरम् मयूरव्यंसकादित्वादन्तरशब्दस्य नित्यसमासः, परनिपातश्च । अयमाशयः – यद्धर्मवत्ताज्ञानात् क्रियान्तराकाङ्क्षोदयः, तादृशज्ञाने प्रकारतयाऽवच्छेदकं यत्तत्सिद्धम्, तदि्भन्नं ज्ञाननिष्ठतादृशाऽऽकांक्षोत्थापकत्वाभावावच्छेदकं वा साधात्वम् । साध्यत्वज्ञानस्य तु न आकाङ्क्षाप्रतिबन्धकत्वम्, क्लृप्तकारणाभावादेव तदनुत्पादात् । न च क्रियान्तराकाक्षानुत्थापकतावच्छेदकधर्मरूपसाध्यत्वेन धात्वर्थोपस्थितौ कृष्णं नमेच्चेत् सुखं यायात् इत्यादौ आकाङ्क्षाऽभावेन क्रियान्तराऽन्वयो न स्यात् इति वाच्यम्, तत्रापि चेत्पादसमवधानेन आकाङ्क्षोत्थापनात् । हिरुग् इत्यादीनां क्रियार्थकत्वव्यवहारस्तु क्रियामात्रविशेषणत्वात्, अत एव न हिरुगा द्यर्थे कारकाणमन्वयः, तेषां तदर्थस्य क्रियान्तराकाङ्क्षत्वादिति । वस्तुतस्तु– सिद्धत्वज्ञाने साध्याकाङ्क्षावत् पच्याद्यर्थे साध्यतया अवगते किम् अस्य साधनम् इत्याकाङ्क्षोदयेन साधनाकाङ्क्षोत्थापकतावच्छेदकरूप वत्वमेव साध्यत्वम् । अत एव एतदेव आदाय अग्रिमग्रन्थसङ्गतिः, अन्यथा पचति भवतीत्यादौ पूर्वोक्तरूपाभावेन तदसङ्गतिः स्पष्टैव । केचित्तु पचतीत्यनुगतव्यवहारादस्ति पचित्वादिकं जातिः । तथा च क्रमिकानेकव्यक्तिवृत्तिजातिरेव क्रिया साध्यत्वञ्च तस्या व्यक्तिद्वारकमेव । स्फोटवद् अस्याः क्रमवद्भिः क्षणैरभिव्यक्तिर्भवतीति भावः ।

## निष्कर्षः

सर्वञ्च नामधातुजमाह इति शाकटायनवचनानुरोधेन सर्वेषामपि लौकिकवैदिकोभयव्यवहारत्मकानां शब्दानां कारणीभूतो धातुर्वर्तते । तस्य धातोः कोऽर्थः? कानि च दार्शनिकानां पारस्परिकमतानि इति जिज्ञासायां समुपपद्यमानायां धात्वर्थविषये विवदन्ते दार्शनिकाः । तत्र प्राचीननैयायिकाः मीमांसकाश्च फलमात्रं धात्वर्थो व्यापारस्तु प्रत्ययार्थ इति स्वीकुर्वन्ति । तेषां मते धातूनां सकर्मकत्वाकर्मकत्वं भञ्ज्यात् एतदर्थमुट्टङ्कयन्ति नव्यवैयाकरणाः –

**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।**
**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥**

कारिकायामस्यां फलञ्च व्यापारश्चेति फलव्यापारौ तयोः फलव्यापारयोरितरेतरद्वन्द्वेन परवल्लिङ्गत्वात् पुँलिङ्गस्य सप्तम्यन्तस्य सप्तम्या विभक्तेर्निरूपितत्वमर्थः । एवञ्च – फलनिष्ठं व्यापारनिष्ठञ्च यद् वाच्यन्तन्निरूपितवाचकतावत्वं धातौ वर्तते । अर्थात् फले व्यापारे च धातुपदस्य शक्तिः । तिङर्थास्तु आश्रयाः । कस्याश्रया इत्याङ्क्षायामुपस्थितत्वात् फलाश्रया व्यापाराश्रया च इत्यर्थः ।

फले प्रधानं व्यापार इत्यस्य तु फलापेक्षया व्यापारः प्रधानमिति भावः। तिङर्थास्तु कर्तृकर्मादयः धात्वर्थे विशेषणं स्मृताः । स्मृत इतयत्र स्मृताश्च स्मृतश्च इति एकशेषेण तिङः स्मृताः, धात ॅस्मृत इति ज्ञेयः । परं धात्वर्थविषये मीमासकनैयायिकादयो दार्शनिका बहुधा विचारं प्रकुर्वन्ति । वैयाकरणमतोन्मज्जनीनामधेये पुस्तके दार्शनिकविचारमन्थनं सुविस्तृतम् । अत्र फले व्यापारे च पृथक् पृथक् शक्तिरिति केचन, केचन एकैव शक्तिरेकवृन्तगतफलद्वयफलत्रितयवत् स्वीकुर्वन्ति।परन्तु फलव्यापारायोरित्यत्र द्विवचनदर्शनात् फले व्यापारे च धातोर्भिन्ना भिन्ना शक्तिः प्रतिभाति ।

तत्र मीमांसकमते द्वितीयाया निष्ठत्वमर्थः, परन्तु धातोः फलमात्रमर्थः व्यापारस्तु प्रत्ययार्थः । प्राचीननैयायिकाः– व्यापारमात्रं धात्वर्थः फलन्तु द्वितीयार्थः एतन्मतद्वयेऽपि धातोः सकर्मकत्वाकर्मकत्वव्यवस्था भञ्ज्यात् । अतः प्राचीननवीनोभयवैयाकरणाः फले व्यापारे च खण्डशः शक्तिं स्वीकुर्वन्ति । नव्यनागेशभट्टमहोदयस्तु फलावच्छिन्ने व्यापारे, व्यापाराछिन्ने फले च धातोः शक्तिः स्वीकरोति । तत्र कर्तृकर्मप्रत्ययानां नियामकत्वं वाञ्छति, कर्तरि फलावच्छिन्ने व्यापारे, कर्मणि च व्यापारावछिन्ने फले शक्तिमुररीकरोति । तथा च देवदत्तः ग्रामं गच्छति, इति

वाक्यात् देवदत्ताभिन्नैककर्तृकवर्तमानकालिकग्रामभिन्नैककर्मकगमनानुकूलो व्यापार इति व्यापारमुख्यविशेष्यकः शब्दबाधो भवति ।

पुनश्च "देवदत्तेन ग्रामो गम्यते" इति कर्मप्रत्ययस्थले तु देवदत्तभिन्नैककर्तृकवर्तमान कालिकव्यापारजन्यग्रामनिष्ठसंयोग इति फलमुख्यविशेष्यकः शब्दबोधो जायते।एतस्मादेव फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, फलसमानधिकरणव्यापारवाचकत्वमकर्मकत्वम्, इति सकर्मकाकर्मकव्यवस्थापि स्थैर्यताम्भजते। उक्तञ्च वैयाकरणभूषणसारे– फलव्यापारयोर्धातुरित्यादिः अनेनार्धेन श्लोकेन वाक्यार्थः, अर्धेन च पदार्थो वर्ण्यते ।

मञ्जूषायामत एवोक्तम् नागेशेन – फलावच्छिन्ने व्यापारे व्यापारवच्छिन्ने फले च क्रमशः कतृकर्मस्थले शक्तिः, इयान्तु विशेषः – फलव्यापारयोः, उभयोर्धातुवाच्यत्वे समानेऽपि प्राचीनवैयाकरणैर्दीक्षितादिभिः सर्वत्र अख्यातस्थले व्यापरमुख्यविशेष्यक एव शब्दबोध अङ्गीकृतः । नागेशादिभिस्तु – कर्मप्रत्ययस्थस्ले फलमुख्यविशेष्यक एव कर्तृपत्ययस्थले च व्यापारमुख्यविशेष्यक एव शाब्दबोध अङ्गीकृतः नागेशेन । एवमेव नव्यनैयायिकैरपि फले व्यापारे च धातोः शक्तिरङ्गीकृता । परन्तु नैयायिकरीत्या प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधः कर्तृप्रत्ययस्थलेऽपि, वैयाकरणास्तु व्यापारमुख्यविशेष्य एव शाब्दबोधं वाञ्छन्ति ।

नैयायिकानाम्– "देवदत्तः ग्रामं गच्छतीत्यत्र कर्तृप्रत्ययस्थले बोधस्तु-वर्तमानकालिकग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृतिमान् देवदत्तः । अत्र समन्वयस्तु- कालस्य परिच्छिन्नत्व–सम्बन्धेन व्यापारेऽन्वयः, ग्रामस्य निष्ठत्वसंबन्धेन संयोगेऽन्वयः, तस्य = संयोगस्य च अनुकूलत्वसम्बन्धेन व्यापारेऽन्वयः, व्यापारस्य च जनकत्वसंबन्धेन कृतावन्वयः, तस्या = कृतेः समवायसंबन्धेन देवदत्तेऽन्वय एवञ्चोक्तबोधः फलतीति भावः।

## सन्दर्भसूची


अमरसिंहः, (वि.सं.२०३१) *अमरकोश :,* के.कृ.पावगी हितचिन्तक प्रेस, रामघाट ।

कौण्डभट्टः, (वि.सं.२०४५) *वैयाकरणभूषणसार* :, वाराणसी, सम्पूर्णनन्दसंस्कृत– विश्वविद्यालयः ।

गदाधरभट्टाचार्यः, (वि.स.२०४१) *व्युत्पत्तिवाद* :, वाराणसी, वाणीविलस प्रकाशन ।

दीक्षितो भट्टोजीः, (वि.सं.२०४०) *वैयाकरणसिद्धान्तकौमुदी,* बम्बई, श्रीवेङ्कटेश्वर स्टीम प्रेस ।

नागेशभट्टः, (वि.स.२०४१) *परमलघुमञ्जूषा,* वाराणसी, श्रीकृष्णदास अकादमी ।

नागेशभट्टः, (वि.स.२०४६) *वैयाकरणसिद्धान्तलघुमञ्जूषा,* वाराणसी, सम्पूर्णानन्द – संस्कृतविश्वविद्यालयः ।

नागेशभट्टः, (वि.स.२०५४) *परमलघुमञ्जूषा,* वाराणसी, श्रीकृष्णदास अकादमी ।

पतञ्जलिः, (सन् १९८७ ) *व्याकरणमहाभाष्यम्,* दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान ३८ यू. ए, जवाहरनगर बंगलो रोड ।

पाणिनिः, (सन् १९९७) *अष्टाध्यायी,* वाराणसी, वाणीविलस प्रकाशन ।

भर्तृहरिः, (सन् २०१६) *वाक्यपदीयम्,* वाराणसी, सम्पूर्णानन्द– संस्कृतविश्वविद्यालयः ।

मण्डनमिश्रः, (सन् १९८७) *मीमांसादर्शनम्,* नूतनदिल्ली श्रीलालबहादुरशास्त्रिकेन्द्रियसंस्कृतविद्यापीठम्, सहितजीतसिंहमार्गः, कटवारियासराय ।

मम्मटः, (सन् १९८०) *काव्यप्रकाश* :, वाराणसी, सम्पूर्णानन्द– संस्कृत –विश्वविद्यालयः । सकस्य मतं विश्वनाथपञ्चाननभट्टाचार्यः, सन् १९८७) *न्यायसिद्धान्तमुक्तावली,* वाराणसी, श्रीहरिकृष्णमणिमालायाः पञ्चमो मणिः श्रीहरिकृष्णनिबन्धभवनम् ।